# bavarNAdi shrI buddhAShTottarashatanAmastotram

# બવર્ણાદિ શ્રીબુદ્ધાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : bavarNAdi buddhAShTottarashatanAmastotram

File name : bavarNAdibuddha108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# bavarNAdi shrI buddhAShTottarashatanAmastotram

# બવર્ણાદિ શ્રીબુદ્ધાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

બુદ્ધો બુધજનાનન્દી બુદ્ધિમાન્ બુદ્ધિચોદનઃ ।
બુદ્ધપ્રિયો બુદ્ધષટ્કો બોધિતાદ્વૈતસંહિતઃ ॥ ૧॥

બુદ્ધિદૂરો બોધરૂપો બુદ્ધસર્વો બુધાન્તરઃ ।
બુદ્ધિકૃત્બુદ્ધિવિદ્બુદ્ધિર્બુદ્ધિભિદ્બુદ્ધિસત્બુધઃ ॥ ૨॥

બુદ્ધ્યાલયો બુદ્ધિલયો બુદ્ધિગમ્યો બુધેશ્વરઃ ।
બુદ્ધ્યકામો બુદ્ધવપુર્બુદ્ધિભોક્તા બુધાવનઃ ॥ ૩॥

બુદ્ધિપ્રતિગતાનન્દો બુદ્ધિમુદ્બુદ્ધિભાસકઃ ।
બુદ્ધિપ્રિયો બુદ્ધ્યવશ્યો બુદ્ધિશોધી બુધાશયઃ ॥ ૪॥

બુદ્ધીશ્વરો બુદ્ધિસખો બુદ્ધિદો બુદ્ધિબાન્ધવઃ ।
બુદ્ધિનિર્મિતભૂતૌઘો બુદ્ધિસાક્ષી બુધોત્તમઃ ॥ ૫॥

બહુરૂપો બહુગુણો બહુમાયો બહુક્રિયઃ ।
બહુભોગો બહુમતો બહુનામા બહુપ્રદઃ ॥ ૬॥

બુધેતરવરાચાર્યો બહુભદ્રો બહુપ્રધઃ ।
વૃન્દારકાવનો બ્રહ્મ બ્રહ્મદૂષણકૈતવઃ ॥ ૭॥

બહ્વૈશ્વર્યો બહુબલો બહુવીર્યો બહુપ્રભઃ ।
બહુવૈરાગ્યભરિતો બહુશ્રી બહુધર્મવિત્ ॥ ૮॥

બહુલોકજયી બન્ધમોચકો બાધિતસ્મરઃ ।
બૃહસ્પતિગુરુર્બ્રહ્મસ્તુતો બ્રહ્માદિનાયકઃ ॥ ૯॥

બ્રહ્માણ્ડનાયકો બ્રધ્નભાસ્વરો બ્રહ્મતત્પરઃ ।
બલભદ્રસખો બદ્ધસુભદ્રો બહુજીવનઃ ॥ ૧૦॥

બહુભુગ્બહિરન્તસ્થો બહિરિન્દ્રિયદુર્ગમઃ ।
બલાહકાભો બાધાચ્છિદ્બિસપુષ્પાભલોચનઃ ॥ ૧૧॥

બૃહદ્દક્ષા બૃહત્ક્રીડો બૃહદ્રામો બૃહત્પ્રિયઃ ।
બૃહત્તૃપ્તો બ્રહ્મરથો બ્રહ્મવિદ્બ્રહ્મપારકૃત્ ॥ ૧૨॥

બાધિતદ્વૈતવિષયો બહુવર્ણવિભાગહૃત્ ।
બૃહજ્જગદ્ભેદદૂષી બહ્વાશ્ચર્યરસોદધિઃ ॥ ૧૩॥

બૃહત્ક્ષમો બહુકૃપો બહુશીલો બલિપ્રિયઃ ।
બાધિતાશિષ્ટનિકરો બાધાતીતો બહૂદયઃ ॥ ૧૪॥

બાધિતાન્તશ્શત્રુજાલો બદ્ધચિત્તહયોત્તમઃ ।
બહુધર્મપ્રવચનો બહુમન્તવ્યભાષિતઃ ॥ ૧૫॥

બર્હિર્મુખશરણ્યં બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ।
બ્રહ્મસ્તુતો બ્રહ્મબન્ધુર્બ્રહ્મસૂર્બ્રહ્મશોઽવતુ ॥ ૧૬॥

॥ ઇતિ બકારાદિ શ્રી બુદ્ધાવતારાષ્ટોત્તરશતનામાવલિઃ
રિયં પરાભવ શ્રાવણબહુલ દ્વિતીયાયાં રામેણ લિખિતા
સમર્પિતા ચ શ્રી હયગ્રીવાયદેવાય વિજયતાન્તરામ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

*bavarNAdi shrI buddhAShTottarashatanAmastotram*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*